# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा–अक्टूबर,२०१९

| | | |
|---|---|---|
| कक्षा –आचार्यप्रथमवर्षम् (SEM-1) | प्रश्नपत्रम् – २ | |
| विषयः – वास्तुशास्त्रम् | (C.C.- 4.1.1. Old & New ) | गुणाः – ७० |
| दिनाङ्कः – १०/१०/२०१९ | ग्रन्थःमयमतम् | समयः –०८.०० तः ११.०० |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितयोः कस्यचित् एकस्य सान्वयं व्याख्यां कुरुत।** **(५)**

(१) या सा भूमिरितिख्यता वर्णानां च विशेषतः।
द्विविधं तत् समुद्दिष्टं गौणमङ्गीत्यनुक्रमात्॥

(२) चतुर्णामधिकाराणां भूरेवादौ प्रवक्ष्यते।
भूतानामादिभूतत्वादाधारत्वाज्जगत्स्थितेः॥

**प्रश्नः २ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु।** **(१०)**

(१) त्याज्यभूमिलक्षणम्।

(२) पञ्चमाऽध्याये भूम्यादिमापनपद्धतयः।

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोलिखितयोः कस्यचित् एकस्य उपरि सान्वयं व्याख्यां कुरुत।** **(५)**

(१) दन्तं वै चन्दनं चैव खदिरःकदरः शमी।
शाकश्च तिन्दुकश्चैव शङ्कुवृक्षाः उदीरिताः॥

(२) वास्तुमध्ये तु मर्माणि ब्रह्मा हृदयमुच्यते।
निष्कूटांशाः सिराज्ञेया इत्येषपुरुषः स्मृतः॥

**प्रश्नः ४ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु।** **(१०)**

(१) वास्तुपुरुषस्य विधानमर्मादिश्च।

(२) बलिकर्मविधानम्।

**तृतीयान्वितिः**

**प्रश्नः ५ अधोलिखितयोः कस्यचित् एकस्य उपरि सान्वयं व्याख्यां कुरुत।** **(५)**

(१) ग्रामः खेटः खर्वटमथदुर्गंनगरमिति च पञ्चविधम्।
दण्डैस्तेषां मानं वक्ष्येऽहं त्रि-त्रि भेदभिन्नानाम्॥

(२) आयव्ययर्क्ष योन्यायुभिरथ तिथिभिश्च वारैश्च।
यजमानवस्तुनामजन्मर्क्षेणा विरोधिकं यत्तु॥

**प्रश्नः ६ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु।** **(१०)**

(१) दण्डादिमानप्रमाणम्।

(२) स्थपतिनिवासः।

**चतुर्थान्वितिः**

**प्रश्नः ७ अधोलिखितयोः कस्यचित् एकस्य उपरि सान्वयं व्याख्यां कुरुत।** **(५)**

(१) सर्वस्याभ्यन्तरतः पांसुचयोपर्यनेकयन्त्रयुतम्।
परितः परिखोपेतं पांसुचये संहताट्टालम्॥

(२) एवं प्रोक्तं भूमिदेवादिकानां वर्णानांचाप्यत्र जात्यन्तराणाम्।
ग्रामादीनां मान विन्यासमार्गं सलङ्कारंचारु सङ्क्षिप्यतन्त्रात्॥

**प्रश्नः ८ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु।** **(१०)**

(१) नगरादिवास्तुविन्यासस्य कथनम्।

(२) पत्तनस्य विशिष्टलक्षणम्।

**प्रश्नः ९ अधोललिखितेषु केषाश्चित् दशप्रश्नानामतिलघूत्तराणि लिखन्तु।** **(१०)**

(१) मात्राङ्गुलप्रमाणं किम्?

(२) धनुर्दण्डः कति हस्तात्मकं भवति?

(३) शङ्कुः कति अङ्गुलात्मिका भवति?

(४) उत्तमकोटिशङ्कुलक्षणं किम्?

(५) मयमतम् कस्यशास्त्रस्य ग्रन्थः?

(६) विन्यासशब्दस्य अर्थः कः?

(७) मर्मस्थानं कुत्र भवति?

(८) मयमतस्य नगरादिवर्णनं मानसारानुगुणं वर्तते न वा?

(९) शङ्कुनिर्माणं केन काष्ठेन क्रियते?

(१०) मयमतम् कस्य मुनेः रचना वर्तते?

(११) दुर्गस्य अपरनाम किम्?

(१२) दुर्गनिर्माणस्य प्रकारः कति विधम्?

(१३) सोपानशब्दस्य अर्थः कः?

(१४) नगरविधानं कस्मिन् अध्याये वर्तते?

(१५) वीथीशब्दस्य अर्थः कः?

--००--